योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ३३

त्रयस्त्रिंशः सर्गः ३३

श्रीवसिष्ठ उवाच ।

सर्वातिशयसाफल्यात्सर्वं सर्वत्र सर्वदा ।

संभवत्येव तस्मात्त्वं शुभोद्योगं न संत्यज ।। १

मित्रस्वजनबन्धूनां नन्दिनानन्ददायिना ।

सरसीशानमासाद्य मृत्युरप्युपनिर्जितः ।। २

सर्वोत्कर्षेण संपन्ना देवा अपि विमर्दिताः ।

दानवैर्दानवार्थाढ्यैर्गजैः पद्माकरा इव ।। ३

मरुत्तनृपतेर्यज्ञे संवर्तेन महर्षिणा ।

ब्रह्मणेवापरः सर्गो भावितः ससुरासुरः ।। ४

महातिशययुक्तेन विश्वामित्रेण विप्रता ।

भूयोभूयः प्रयुक्तेन दुष्प्रापा तपसार्जिता ।। ५

पिष्टसेकाम्बु दुष्प्रापं रसायनवदश्नता ।

दुर्भगेनेदृशेनाप्तः क्षीरोद उपमन्युना ।। ६

त्रैलोक्यमल्लांस्तृणवदश्नन्विष्णवलजादिकान् ।

भक्त्यातिशयदार्ढ्येन कालः श्वेतेन कालितः ।। ७

प्रणयेन यमं जित्वा कृत्वा वचनसंगमम् ।

परलोकादुपानीतः सावित्र्या सत्यवान्पतिः ।। ८

न सोऽस्त्यतिशयो लोके यस्यास्ति न फलं स्फुटम् ।

भवितव्यं विचार्यान्तः सर्वातिशयशालिना ।। ९

आत्मज्ञानमशेषाणां सुखदुःखदशादृशाम् ।

मूलकाषकरं तस्माद्भाव्यं तत्रातिशायिना ।। १०
नाशायापद्गतार्थिन्या दृष्ट्या दृश्यादिदृष्टयः ।
दुःखादृते निराबाधं सुखं किं चिदवाप्यते ।। ११
अशमः परमं ब्रह्म शमश्च परमं पदम् ।
यद्यप्येवं तथाप्येनं प्रथमं विद्धि शंकरम् ।। १२
अभिमानं परित्यज्य शममाश्रित्य शाश्वतम् ।
विचार्य प्रज्ञयार्यत्वं कुर्यात्सज्जनसेवनम् ।। १३
न तपांसि न तीर्थानि न शास्त्राणि जयन्ति च ।
संसारसागरोत्तारे सज्जनासेवनं विना ।। १४
लोभमोहरुषां यस्य तनुतानुदिनं भवेत् ।
यथाशास्त्रं विहरति स्वस्वकर्मसु सज्जनः ।। १५
अथात्मविदुषां सङ्गात्तस्य साधोः प्रवर्तते ।
अत्यन्ताभाव एवास्य यथा दृश्यस्य दृश्यते ।। १६
दृश्यात्यन्ताभावतस्तु परमेवावशिष्यते ।
अन्याभाववशादाशु जीवस्तत्रैव लीयते ।। १७
नचोत्पन्नं नचैवासीद्दृश्यं नच भविष्यति ।
वर्तमानेऽपि नैवास्ति परमेवास्त्यवेधितम् ।। १८
एवं युक्तिसहस्रेण दर्शितं दृश्यतेऽपि च ।
सर्वैरेवानुभूतं च दर्शयिष्यामि चाधुना ।। १९
तथेदममलं शान्तं त्रिजगत्संविदम्बरम् ।
इदं तत्त्वमतत्त्वादि कुतोऽत्र स्यात्कथं च वा ।। २०
चिच्चमत्कुरुते चारु चञ्चलाऽचञ्चलात्मनि ।
यत्तयैव तदेवेदं जगदित्यवबुध्यते ।। २१
त्रैलोक्यभूयोनुभवश्चिदादित्यांशुमण्डलम् ।
को वा स्वांशुमतोर्भेदो निर्विकल्पःस कथ्यताम् ।।२२
स्वाभावतोऽस्याश्चिदृष्टेर्ये उन्मेषनिमेषणे ।

जगद्रूपानुभूतेस्तावेतावस्तमयोदयौ ।। २३

अहमर्थोऽपरिज्ञातः परमार्थाम्बरे मलम् ।

परिज्ञातोऽहमर्थस्तु परमात्माम्बरं भवेत् ।। २४

अहंभावः परिज्ञातो नाहंभावो भवत्यलम् ।

एकतामम्बुनेवाम्बु याति चिन्नभसात्मना ।। २५

अहमादिजगद्दृश्यं किल नास्त्येव वस्तुतः ।

अवश्यमेव तत्तस्माच्छिष्यतेऽहंविचारतः ।। २६

बाध्यते चामलधियामपिशाचे पिशाचधीः ।

शिशूनां तावदाध्वान्तःकरणानां विचारणा ।। २७

चिज्ज्योत्स्ना यावदेवान्तरहंकारघनावृता ।

विकासयति नो तावत्परमार्थकुमुद्वतीम् ।। २८

प्रमार्जितेऽहमित्यस्मिन्पदे स्वार्थे स्वयं विना ।

नरकस्वर्गमोक्षादितृष्णायाः कल्पनैव का ।। २९

हृदि यावदहंभावो वारिदः प्रविजृम्भते ।

तावद्विकासमायाति तृष्णाकुटजमञ्जरी ।। ३०

आक्रम्य चेतनां नित्यमहंकाराम्बुदे स्थिते ।

जाड्यमेव स्थितिं याति न प्रकाशः कदाचन ।। ३१

असन्नयमहंकारः स्वयं मिथ्या प्रकल्पितः ।

दुःखायैव न हर्षाय बालसंभ्रमयक्षवत् ।। ३२

मुधैव कल्पितो मोहमहंभावः प्रयच्छति ।

अनन्तसंसारकरं दामादिष्विव दुर्मतौ ।। ३३

अयं सोऽहमिति स्फारान्मोहादन्यतरत्तमः ।

अनर्थभूतं संसारे न भूतं न भविष्यति ।। ३४

यत्किंचिदिदमायाति सुखदुःखमलं भवे ।

तदहंकारचक्रस्य प्रविकारो विजृम्भते ।। ३५

अहंकाराङ्कुरः कृष्टो हृदयेनावरोपितः ।

सहस्रशाखं दुश्छेदं तस्य संसृतिनाशनम् ।। ३६

अहंभावोऽङ्कुरो जन्म वृक्षाणामक्षयात्मनाम् ।

ममेदमिति विस्तीर्णास्तेषां शाखाः सहस्रशः ।। ३७

करटापातविस्फोटा भान्त्यर्था वासनादयः ।

विचार्यचारुरववत्तरङ्गवरपङ्किवत् ।। ३८

अहंभावनया भाति त्वमहंभाववर्जितः ।

संसारचक्रवहनमात्मनः परिरोधया ।। ३९

अहंभावतमो यावज्जन्मारण्ये विजृम्भते ।

तावदेता विवल्गन्ति चिन्तामत्ताः पिशाचिकाः।। ४०

अहंकारपिशाचेन गृहीतो यो नराधमः ।

न शास्त्राणि न मन्त्राश्च तस्याभावस्य सिद्धये ।। ४१

श्रीराम उवाच ।

केनोपायेन भगवन्नहंकारो न वर्धते ।

तं त्वं कथय मे ब्रह्मन्संसारभयशान्तये ।। ४२

श्रीवसिष्ठ उवाच ।

चिन्मात्रदर्पणाकारे निर्मले स्वात्मनि स्थिते ।

इति भावानुसंधानादहंकारो न वर्धते ।। ४३

मिथ्येयमिन्द्रजालश्रीः किं मे स्नेहविरागयोः ।

इत्यन्तरानुसंधानादहंकारो न जायते ।। ४४

नाहमात्मनि नो यस्य दृश्यश्रिय इति स्वयम् ।

शान्तेन व्यवहारेण नाहंकारः प्रवर्धते ।। ४५

अहं हि जगदित्यन्तर्हेयादेयदृशोः क्षये ।

समतायां प्रसन्नायां नाहंभावः प्रवर्धते ।। ४६

अहं चिज्जगदित्यन्तर्हेयादेयदृशोः क्षये ।

समतायां प्रसन्नायां नाहंभावः प्रवर्धते ।। ४७

श्रीराम उवाच ।

किमाकृतिरहंकारः कथं संत्यज्यते प्रभो ।

सशरीरोऽशरीरश्च त्यक्ते तस्मिंश्च किं भवेत् ।। ४८

श्रीवसिष्ठ उवाच ।

त्रिविधो राघवास्तीह त्वहंकारो जगत्त्रये ।

द्वौ श्रेष्ठावितरस्त्याज्यः श्रृणु त्वं कथयामि ते ।। ४९

अहं सर्वमिदं विश्वं परमात्माहमच्युतः ।

नान्यदस्तीति परमा विज्ञेया सा ह्यहंकृतिः ।। ५०

मोक्षायैषा न बन्धाय जीवन्मुक्तस्य विद्यते ।

सर्वस्माद्व्यतिरिक्तोऽहं बालाग्रशतकल्पितः ।। ५१

इति या संविदेषासौ द्वितीयाहंकृतिः शुभा ।

मोक्षायैषा न बन्धाय जीवन्मुक्तस्य विद्यते ।। ५२

अहंकाराभिधा या सा कल्प्यते नतु वास्तवी ।

पाणिपादादिमात्रोऽयमहमित्येष निश्चयः ।। ५३

अहंकारस्तृतीयोऽसौ लौकिकस्तुच्छ एव सः ।

वर्ज्य एव दुरात्मासौ शत्रुरेव परः स्मृतः ।। ५४

अनेनाभिहतो जन्तुर्न भूयः परिरोहति ।

रिपुणानेन बलिना विविधाधिप्रदायिना ।। ५५

कष्टीकृतमतिर्लोकः संकटेष्वेव मज्जति ।

अनया दुरहंकृत्या भावात्संसक्तया चिरम् ।। ५६

शिष्टाहंकारवाञ्जन्तुर्भगवान्याति मुक्तताम् ।

लोकाहंकारवद्दोषवपुरस्मिन्निरूपणः ।। ५७

न देहोऽस्मीति निर्णीय वर्जनं महतां मतम् ।

प्रथमं द्वावहंकारावङ्गीकृत्यान्त्यलौकिकौ ।। ५८

प्रथमं द्वावहंकारावङ्गीकृत्यान्त्यलौकिकौ ।

तृतीयाहंकृतिस्त्याज्या लौकिकी दुःखदायिनी ।। ५९

अनया दुरहंकृत्या दामव्यालकटाः किल ।

तां दशां समनुप्राप्ता या कथास्वपि खेददा ।। ६०

श्रीराम उवाच ।

तृतीयां लौकिकीमेतां त्यक्त्वा चित्तादहंकृतिम् ।

किंभावः पुरुषो ब्रह्मन्प्राप्नुयादात्मनो हितम् ।। ६१

श्रीवसिष्ठ उवाच ।

एषा तावत्परित्याज्या त्यक्त्वैतां दुःखदायिनीम् ।

यथा यथा पुमांस्तिष्ठेत्परमेति तथा तथा ।। ६२

अहंकारदृशावेते पूर्वोक्ते भावयन्यदि ।

तिष्ठेदुपैति परमं तत्पदं पुरुषोऽनघ ।। ६३

अथ ते अपि संत्यज्य सर्वाहंकृतिवर्जितः ।

संतिष्ठेत तथात्युच्चैः पदमेवाधिरोहति ।। ६४

सर्वदा सर्वयत्नेन लौकिकी दुरहंकृतिः ।

परमानन्दबोधाय वर्जनीयाऽनया धिया ।। ६५

शरीरास्थामयापुण्यदुरहंकारवर्जनम् ।

अत्यन्तपरमं श्रेय एतदेव परं पदम् ।। ६६

भावादहंकृतिं त्यक्त्वा स्थूलामेतां हि लौकिकीम् ।

तिष्ठन्व्यवहरन्वापि न नरः प्रपतत्यधः ।। ६७

संशान्ताहंकृतेर्जन्तोर्भोगा रोगा महामते ।

न स्वदन्ते सुतृप्तस्य यथा प्रतिविषा रसाः ।। ६८

भोगेष्वस्वदमानेषु पुंसः श्रेयः पुरो गतम् ।

क्षीणेऽन्धकारे किं नाम मनसोऽन्यत्प्रवर्तते ।। ६९

अहंकारानुसंधानवर्जनादेव राघव ।

पौरुषेण प्रयत्नाच्च तीर्यते भवसागरः ।। ७०

नाहं न तेन मम किंचिदपीति मत्वा

सर्वं च मे सकलमप्यहमेव चेति ।

लब्धास्पदं मनसि संविदमेवमीड्यां

नीत्वा स्थितिं परमुपैति पदं महात्मा ।। ७१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मो० स्थितिप्रकरणे दामव्यालकटोपाख्यानेऽहंकारविचारो नाम त्रयस्त्रिंशः सर्गः ।। ३३ ।।